"दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह" इति मनुः। "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" इति रघुः।

**अधीर** त्रि॰ धीरः धैर्य्यान्वितः न॰त॰। चञ्चले, "कान्तस्याधरमणिम् अधीरमाचुचुम्बेति" दशकु॰। कातरे, रोगादिनाकुलचित्ते च। विद्युति, नायिकाभेदे च स्त्री। तल्लक्षणं नायिकाशब्दे वक्ष्यते

**अधीवास** अधि+वस आच्छादने करणे घञ्। सर्व्वत आवरके महाकञ्चुके वस्त्रभेदे। "अधीवासं परिमुच्योष्णीषं संवेष्ट्य निवीते" इति कात्या॰ १५,५,१२, उपरि सर्वतः संछाद्यतेऽनेनेत्यधीवासः महाकञ्चुक इति तद्व्याख्या। "अधीवासेन प्रच्छादयतीति" कात्या॰ २०,६,१५, "उपरिष्टादावरकं वासोऽधीवास" इति वेददीपः।

**अधीश** त्रि॰ अधिक ईशः प्रा॰स॰। सार्वभौमे अधिपतौ च। "अङ्गाधीशः स्वगेहे बुधगुरुकविभिः संयुत" इति जात॰।

**अधीश्वर** त्रि॰ अधिक ईश्वरः प्रा॰स॰। स्त्रियां ङीष्। राजनि "अधिगत्य जगत्यधीश्वरादिति" नैष॰। प्रभौ च।

**अधीष्ट** न॰ अधि+दिवा॰इष–भावे क्त। सत्कारपूर्व्वकनियोगे, "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङिति" पा॰ "अधीष्टं सत्कारपूर्व्वकव्यापार" इति सि॰कौ॰। कर्म्मणि क्त। सत्कारपूर्व्वकं नियोजिते त्रि॰।

**अधुना** अव्य॰ अस्मिन् काले इदम्शब्दस्य न॰। संप्रत्यर्थे "प्रमदानामधुना" विडम्बनेति कुमा॰। अधुना भवार्थे ठञ्। आधुनिकः इदानीन्तने त्रि॰। [स्त्रियां ङीप्।

**अधुनातन** त्रि॰ अधुना+भवार्थे ट्युल् तुट् च। इदानीम्भवे

**अधुर** नास्ति धूः चिन्ता भारो वा यस्य अच्समा॰। भारशून्ये चिन्ताशून्ये च, न॰त॰। अधूः–अभारे अचिन्ते च। अत्वे तु नाच्समा॰। अधूरक्षः इति।

**अधूमक** पु॰ नास्ति धूमो यत्र कप्। धूमशून्ये ज्वलदग्नौ।

**अधृत** पु॰ न धृतः। सर्वेषां धारकत्वेन केनापि न धृते परमेश्वरे, श्रुतौ "स भगवः! कस्मिन् प्रतिष्ठितः?" इति प्रश्ने "स्वे महिम्नी"त्युत्तरम् तेनान्याधृतत्वात् स्वप्रतिष्ठत्वाच्च तस्य तथात्वम्। "अधृतः स्वधृतः स्वास्य इति विष्णु सहस्र॰।

**अधृति** स्त्री धृतिर्धारणं धैर्य्यं वा अभावार्थे न॰त॰। धारणाभावे, धैर्य्याभावे, च।

**अधृष्ट** त्रि॰ धृष–निर्लज्जत्वे क्त न॰त॰। लज्जाशीले। धृष–अभिभवे क्त न॰त॰। अनभिभूते "यन्त नो-मित्रावरुणावधृष्टमिति ऋ॰६,६७,२, अधृष्टमनभिभूतमिति भा॰। अहिंसिते च। "इतासोवसवोऽधृष्टा" इति ऋ॰ ६,५०,४, "अधृष्टा अहिंसिता" इति भा॰।

**अधृष्य** त्रि॰ न धृष्यः न॰त॰। अनभिभवनीये "अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णव" इति रघुः। धृष–निर्लज्जत्वे भावे क्यप् तन्नास्ति यस्य। अप्रगल्भे, लज्जाशीले च त्रि॰।

**अधेनु** स्त्री न॰त॰। दोहनशून्यायां गवि। "अधेनुं दस्रा स्तर्य्यमिति" ऋ॰ १,११७,२०, "अधेनुम् अदोग्ध्रीमिति" भा॰। [शून्ये त्रि॰।

**अधैर्य्य** न॰ अभावार्थे न॰त॰। धैर्य्याभावे। ब॰। धैर्य्य-

**अधोअक्ष** त्रि॰ अधः अक्षस्य, अधस्तात् अक्षति अश्नुते वा अक्ष–अच्, अश–स वा वेदे अतोलोपाभावः। अधरस्ताद्व्यापके। "अधोअक्षाः सिन्धवः स्रोत्याभिरिति" ऋ॰ ३ ६२,८, "यदापः अक्षस्याधस्ताद्भवन्ति तदा रथादीनि नेतुं शक्यन्ते" इति भा॰। [अधादेशश्च। परिधानवस्त्रे।

**अधोंऽशुक** न॰ अधरमंशुकम् अधर+प्रथमार्थे असि अधरस्य

**अधोऽक्ष** न॰ अधरमक्षं यत्र मार्गे अधर+प्रथमार्थे असि ब॰। हविर्धानाक्षाधोमार्गे। "दक्षिणस्याक्षं प्राञ्चो निष्क्रामतीति" का॰ १२, ४, १४, दक्षिणहविर्धानाक्षाधोमार्गेण प्राङ्मुखा निःसरन्तीति" वेददीपः।

**अधोऽक्षज** पु॰ अक्षात् इन्द्रियात् जायते जन–ड ५त॰। अक्षजं प्रत्यक्षज्ञानम् अधरं ग्राहकत्वाभावाद्धीनं यस्य अधर–प्रथमार्थे असि अधादेशश्च। इन्द्रियायोग्ये, "अधो न क्षीयते जातु यस्मात्तस्मादधोऽक्षज" इत्युक्तलक्षणे, वा विष्णौ। "व्याप्तो वायुरधोऽक्षज" इति विष्णुसह॰। "द्यौरक्षं पृथिवी चाधस्तयोर्यस्मादजायत। मध्ये वैराजरूपेण ततोऽधोक्षजइष्यते" इति भाष्ये तथा च अण्डकपालद्वयमध्ये विराड्रूपेण जातत्वादस्य तथात्वम्। अधोभूते स्वस्वविषयेभ्यो निवर्त्तनेन प्रत्यक्प्रवाहिते अक्षगणे जायते प्रकाशते इति अधोक्षज इति वा। तत्रैवार्थे।

**अधोगति** स्त्री अधरस्मिन् अधस्तात् नरकादौ गतिः नरकादिगमने "साधकानां त्वधोगतिरिरिति" तन्त्र॰। नरकस्य च पापफलत्वेन पुण्यादधरत्वात् अधरत्वम् "और्वे च सर्वे नरकाः सदैत्या" इति (सि॰शिरो॰) और्वस्थाने एव नरकस्थितिरुक्ता और्वस्थिति स्व। "स्वादूदकान्तर्वडवानलोऽसौ पातालोकाः पृथिवीपुटानी"त्यनेन पातालसन्निकृष्टे तत्रैवोक्ता। अतो नरकानामधःस्थत्वम्, भूगोलशब्दे विवरणं द्रष्टव्यम्। "जघन्यगुणवृत्तास्तु अधोगच्छन्ति तामसा इत्युक्तेः तामसानामधोगतित्वम्। अधोगतित्वञ्च पापादेव। अधःप्रदेशमात्रे गमने च "सूत्रा-